# <u>শুকনাসোপদেশ BR. QS.</u>

**वाणभट्टस्य रचनाशैली सोदाहरणं वर्ण्यताम् ?**
**अथवा, 'वाणोच्छिष्टं जगत् सर्वम्' - इति विचार्य्यताम् ?**

**<u>उत्तरम्</u>-**

गद्यरचनया एव कविप्रतिभायाः श्रेष्ठत्वनिर्णयः क्रियते - 'गद्यं कवीनां निकषं वदन्ति' इति । महाकविः वाणभट्टः हर्षचरितं, कादम्वरी इति गद्यकाव्यद्वयं रचितवान्। हर्षचरितम् आख्यायिकाजातीयं गद्यकाव्यं तथा कादम्वरी कथाजातीयं गद्यकाव्यम् । सप्तमशतकस्य नृपतिं हर्षचरितम् आश्रित्य हर्षचरितमिति काव्यं रचितं तथा प्रजन्मत्रयस्य प्रणयवृत्तान्तम् अवलम्ब्य कादम्वरी रचिता। जागतिकं सकलं विषयम् आश्रित्य महाकविना वाणभट्टेन काव्यद्वयं रचितम् ।

गुण-रस-अलङ्कार-शब्दचयनप्रभृतिभिः समृद्धः वाणस्य काव्यसमूहः। दशविधेषु गुणेषु प्रसादस्य माधुर्यस्य य गुणेस्य एव प्राधान्यं दृश्यते। नानाविधानां रसानां सम्भारः तस्य काव्येषु अवलोक्यते। मूलः रसः हि विप्रलम्भशृङ्गारः।
तदुक्तम् -
" यत्र तु रतिः प्रकृष्टा नाभीष्टम् उपैति विप्रलम्भोऽसौ" इति। अन्ये रसाः अपि प्रयुज्यन्ते। उपमा, रुपकम्, उत्प्रेक्षा, श्लेषः, एकावली, दृष्टान्तः चेत्या दीनाम् अलङ्काराणां प्रयोगः मनः रञ्जयति।

दृष्टान्तालङ्कारस्य उदाहरणं यथा -
" न ह्यल्पीयसा शोककारणेन क्षेत्रीक्रियन्ते एवंविधा मूर्तयः" (महाश्वेतावर्णनम्) इति ।

उत्प्रेक्षालङ्कारस्य उदाहरणं यथा -
" उपषान्तवचसि शुकनासे चन्द्रपीडः नाभिरुपदेशवाग्भिः प्रक्षालितः इव, उन्मीलित इव, स्वच्छीकृत इव, निर्मृष्ट इव, अभिषिक्त इव....प्रीतहृदयो मुहूर्तं स्थित्वा स्वभवनमाजगाम्"। इति (शुकनासोपदेशः)।

कादम्वरीकाव्ये वाणभट्टः पाञ्चालीरीतिमेव प्राधान्येन अनुसृतवान्। वैदर्भी-गौडी प्रभृतयः रीतयः तु न विरलाः। सुभाषिणी सुनयना रमणी यथा स्वसौन्दर्येण जगत् मुग्धं करोति, तथैव वाणस्य अर्थ-गौरवयुक्तः पदसमुच्चयः

पण्डितानां मनः सुलभतया मुग्धं करोति। पौराणिकम् आख्यानं वाणस्य काव्येषु भूयशः परिलक्ष्यते। यथा - भगवतः श्रीकृष्णस्य नरसिंहरुपेण वामनावतारेण च आविर्भावस्य विषयः राजसिकपुराने वर्णितः। तदुक्तं वाणेन -
"नाम्नैव यो निर्भिन्नारातिहृदयो विचरितनरसिंहरुपाडम्बरम्
एकविक्रमाक्रान्तसकलभुवनतलो विक्रमत्रयायासितभुवनत्रयं जहासेव वासुदेवम्" इति।

वाणभट्टः आसीत् सकलशास्त्रेषु निपुणः। अतः तस्य काव्येषु श्रुतिः, स्मृतिः, दर्शनं, रामायणम्, महाभारतम् चेत्यादिशास्त्रेषु पाण्डित्यं प्रकाशते। हर्षचरिते कविः स्वयमेव अवदत् - "सम्यक् पठितः साङ्गो वेदाः श्रुतानि यथाशक्ति शास्त्राणि" इति। तस्य उपस्थापनकुशलतायां प्रत्यकं चरित्रं जीवन्तं जातम्। यथा - महाराजः हर्षवर्धनः, राज्यश्रीः, राजा शुद्रकः, महाश्वेता, कादम्वरी, शुकनासः, महाराजः, ताडापीडः चेति। वाणस्य काव्येषु सुदीर्घसमासबद्धपदस्य, द्वयर्थकशब्दस्ययनस्य तथा व्याकरणस्य प्रयोगः परिलक्षते। क्रियापदेन एव तस्य वाक्यम् आरभ्यते।

मानवानाम् अन्तरस्य आनन्दधारा तस्य काव्येषु वर्षिता। अतः तस्य काव्येस्य ऊषरमरुभूमौ मनिहारिणी वर्णना मरुद्यानस्य सजीवताम् आनयति। वाणस्य गद्यशैली समृद्धेः परिपुष्टेश्च सर्वोत्तमं निदर्शनम्। अस्मिन् जगति न कोऽपि विषयः वर्तते, यः वाणस्य कृतिषु न प्राप्यते। अतः प्रचलितः एतादृशः प्रवादः यथार्थः एव -

'वाणोच्छिष्टं जगत् सर्वम्' इति।

अथवा साधु उक्तम् -

"वाणी वाणो बभुव" इति।

अपि च, कथितम् -

"पञ्चाननो वाणः" इति।

परिशेषे एतदेव वक्तुं शक्यते यत् - वाणभट्टस्य काव्येषु कति त्रुटः अपि सन्ति। विशेषतः कर्तुः क्रियायाः च मध्ये वृहद् व्यवधानम्, सुदीर्घसमासवद्धपदस्य प्रयोगः चेति दृष्टिपथे भूयः भूयः आगच्छन्ति। अतः तस्य काव्यकानने साधारणमानवानां प्रवेशः अतीव दुःसाध्यः इति शिवम्।